Roll No. ........................ Total No. of Pages : 3

Total No. of Questions : 6

# पूर्वमध्यमा द्वितीयखण्ड

## विषय कोड : 619

## दर्शनम्

## षष्ठम्-प्रश्नपत्रम्

**समय : 3 घण्टे** **पूर्णांक : 100**

निर्देश:—सर्वे प्रशना: समाधेया:।

1. यथोचितं विकल्पं लिखतु – 5×2=10

(*i*) अनुमानम् अस्ति –

(क) परामर्शजन्यम् (ख) अनुमितिकरणम्

(ग) व्याप्ति विशिष्ट (घ) व्याप्ति:

(*ii*) अनुमिति: अस्ति –

(क) अनुमितिकरणं (ख) परामर्शजन्यं

(ग) वह्निव्याप्य (घ) साहचर्य नियम्

(*iii*) साहचर्यनियम: अस्ति –

(क) परामर्शस्य (ख) अनुमानस्य

(ग) व्याप्ते: (घ) कोऽपि न

(*iv*) व्याप्यस्य पर्वतादि वृत्तित्वं अस्ति –

(क) पक्षधर्मता (ख) स्वार्थानुमानम्

(ग) परार्थानुमानम् (घ) लिङ्गम्

(v) सन्दिग्ध साध्यवान् अस्ति –

(क) विपक्षः (ख) सपक्षः

(ग) पक्षः (घ) हेत्वाभासः

2. रिक्तस्थानानि पूरयतु – 5×2=10

(i) वह्निव्याप्य.................................पर्वत इति।

(ii) यत्र-यत्र........................तत्र-तत्राग्निः।

(iii) अन्वयमात्र..........................केवलान्वपि।

(iv) सव्यभिचारोऽ....................................।

(v) सर्व सपक्ष...........................व्यावृत्तः।

3. यथायोग्यं योजयत – 5×3=15

| | | | |
|---|---|---|---|
| (i) | अनुमानम् | – | व्यापत्वासिद्धः |
| (ii) | लिङ्गम् | – | सपक्षः |
| (iii) | हेत्वाभासाः | – | द्विविधं |
| (iv) | निश्चितसाध्यवान् | – | त्रिविधं |
| (v) | सोपाधिकोहेतुः | – | पञ्चविधः। |

4. सत्य कथनानां समक्षम् 'सत्यम्' असत्य कथनानां समक्षम् 'असत्यम्' लिखतु – 5×3=15

(i) साहचर्य नियमो परामर्शः।

(ii) धूमत्वादिति हेतुः।

(iii) व्यतिरेक मात्र व्याप्तिकम् केवल व्यतिरेकि।

(iv) असिद्धः चतुर्विधः।

(v) उपमितिकरणं अनुमानम्।



363

5. लघूत्तरीया: प्रश्ना: – 5×4=20

(i) के पञ्चावयवा: ?

(ii) आसाधारणस्य लक्षणं उदाहरणञ्च लिखतु।

(iii) सन्निधि: क: ?

(iv) संसयस्य किं लक्षणं ?

(v) विपर्यय: क: ?

6. दीर्घ उत्तरीया: प्रश्ना। 3×10=30

(i) सपदकृत्यं परार्थानुमानं निरूपयत।

(ii) सपदकृत्यं केवलान्वयि निरूपणीयम्।

(iii) सत्प्रतिपक्ष: क: सपदकृत्यं विवेचनीयम्।



364

प्राशिक कोड क्र. 2/1918

पृष्ठ क्र.- 01

परीक्षा का नाम :- पूर्वमध्यमा / ~~उत्तरमध्यमा~~, खण्ड-~~प्रथम~~ / द्वितीय

प्रश्न ~~पत्र~~/आदर्श उत्तर

विषय दर्शनम् विषय कोड 619 माध्यम संस्कृतम्

कुल प्रश्न 06

समय – 3 घण्टा

पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| 01 | उत्तरम् (i) (ख) अनुमिति करणम् ।<br>(ii) (ख) परामर्श जन्यम् ।<br>(iii) (ग) व्याप्तेः ।<br>(iv) (क) पक्षधर्मता ।<br>(v) (ग) पक्षः । | |
| 02 | उत्तरम् (i) धूमवानयम् ।<br>(ii) धूमः ।<br>(iii) व्याप्तिकम् ।<br>(iv) अनैकान्तिकः ।<br>(v) विपक्ष । | |
| 03 | उत्तरम् (i) द्विविधं ।<br>(ii) त्रिविधं ।<br>(iii) पञ्चविधः ।<br>(iv) सपक्षः ।<br>(v) व्याप्यत्वासिद्धः । | |
| 04 | उत्तरम् (i) असत्यंम् ।<br>(ii) सत्यम् ।<br>(iii) सत्यम् ।<br>(iv) असत्यम् ।<br>(v) असत्यम् । | |

हस्ताक्षर

प्राश्निक कोड क्रं 2/1918

पृष्ठ क्र.- 02

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय दर्शनम् विषय कोड 619 माध्यम संस्कृतम्

कुल प्रश्न 06

समय – 3 घण्टा पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| 05 | उत्तरम् (i) प्रतिज्ञाहेतूदाहरणोपनय-निगमनानि पञ्चावयवाः। 1. पर्वतो वह्निमानिति प्रतिज्ञा 2. धूमत्वादिति हेतुः। 3. यो यो धूमवान् स स वह्निमानित्युदाहरणम्। 4. तथा चाऽय-मित्युपनयः 5. तस्मात्तथेति निगमनम्। | |
| | (ii) सर्वसपक्षविपक्षव्यावृत्तः। पक्षमात्रवृत्तिर-साधारणः। यथा-शब्दो नित्यः शब्दत्वादिति शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्र वृत्तिः। | |
| | (iii) पदानामविलम्बेनोच्चारण सन्निधिः। | |
| | (iv) एकस्मिन्धर्मिणि विरुद्धनानाधर्म वैशिष्ट्या ऽवगाहिज्ञानं संशयः यथा-स्थाणुर्वा पुरुषो वेति। | |
| | (v) मिथ्याज्ञानं विपर्ययः। यथा शुक्तौ "रजतम्" इति। | |
| 06 | उत्तरम् (i) लक्षणं→ यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चाऽवयववाक्यं प्रयुज्यते तत् पराऽर्थानुमानम्। यथा- पर्वतो वह्निमान्, धूमवत्वात्, यो यो धूमवान् स स वह्निमान्। यथा- महानसम् तथा चाऽयम् तस्मात्तथा इति। अनेन प्रतिपादिताल्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते। | |
| | पदकृत्यं→ क्रमप्राप्तं पराऽर्थाऽनुमानमाह- यत्तु इति। यत पञ्चाऽवयववाक्यं प्रयुज्यते तत् परार्थाऽनुमानम् इति सम्बन्धः पञ्चाऽवयवेति। | |

हस्ताक्षर

प्राश्निक कोड क्र. 21/4/18

पृष्ठ क्र.- 03

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

प्रश्न पत्र/आदर्श उत्तर

विषय दर्शनम् विषय कोड 619

कुल प्रश्न 06 माध्यम संस्कृतम्

समय – 3 घण्टा

निर्देश

पूर्णांक 100

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | अत्राऽवयवत्वं नाम द्रव्य समवायिकारणत्वं प्रतिज्ञादिषु तदसम्भवात् कथमेते अवयवाः स्युः इति चेदनुमानवाक्यैकदेशान्तु अवयवा इत्युपचर्यते इति गृहाण । ननु एवमपि पञ्चावयववाक्यस्य अनुमानत्वमेव न विचारसहं, तस्य लिङ्गपरामर्शत्वाऽभावात् इति चेत् ? नैवं, लिङ्गपरामर्शप्रयोजकलिङ्गप्रतिपादकत्वेन अनुमानम् इत्युपचार-मात्रत्वात् । तदुदाहरति-यथेति । तथा चाऽयमिति । अयं च पर्वतः तथा वह्निव्याप्यधूमवानित्यर्थः । अनेनेति । अनेन पञ्चाऽवयववाक्येन इत्यर्थः । | |
| | (ii) लक्षणं⇒ अन्वमात्रव्याप्तिकं केवलाऽन्वयि । यथा- घटोऽभिधेयः प्रमेयत्वात् । अत्र प्रमेयत्वाऽभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नाऽस्ति, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च । | |
| | पदकृत्यं → केवलाऽन्वयिनो लक्षणमाह – अन्वयेति । अन्वयेनैव व्याप्तिर्यस्मिन् स तथा । प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिं निराकरोति – अत्रेति । अभिधेयत्वसाधकाऽनुमाने इत्यर्थः । कुतस्तन्निषेधोऽतस्तत्र हेतुमाह – सर्वस्येति । पदार्थमात्रस्येत्यर्थः । तथा च सकलपदाऽभिधेयत्वस्य ईश्वरप्रमाविषयत्वस्य च अत्यन्ताऽभावाऽप्रतियोगिकत्वरूपकेवलाऽन्वयित्वेन तदभावाऽप्रसिद्ध्या तदघटितव्यतिरेकव्याप्तिर्न सम्भवत्येवेति भावः । | |

हस्ताक्षर

(1)

| प्राश्निक कोड क्रं. 21918 |
|---|

पृष्ठ क्र.- 04

~~प्रश्न पत्र~~/आदर्श उत्तर

परीक्षा का नाम :- ~~पूर्वमध्यमा~~ / उत्तरमध्यमा, खण्ड-~~प्रथम~~ / द्वितीय

विषय: दर्शनम् विषय कोड 619 माध्यम संस्कृतम्

कुल प्रश्न: 06

समय – 3 घण्टा पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | (iii) लक्षणं → यस्य साध्याऽभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा-शब्दो नित्यः श्रावणत्वात्, शब्दत्ववत्। शब्दोऽनित्यः कार्यत्वाद् घटवत्। | |
| | पदकृत्यं → सत्प्रतिपक्षं लक्षयति-साध्येति। यस्य हेतोः। साध्याऽभावसाधकं-साध्याऽभावस्याऽनुमापकं, हेत्वन्तरं=प्रतिपक्षो हेतुर्विद्यते स हेतुः सत्प्रतिपक्ष इत्यर्थः। अयमेव प्रकरणसम इत्युच्यते। विरुद्धवारणाय हेत्वन्तरं यस्येति वह्न्यादि वारणाय साध्याऽभावेति। | |

परीक्षितम्

हस्ताक्षर

368